गोरची २ ताम्रदुग्धा ३ रसायनी ४ बहुपत्नीप्र अमृता ६ जीवा ७ अमृतसञ्जीवनी ८। अस्या गुणाः। मधुरत्वम्। वृष्यत्वम्। संग्राहित्वम्। हिमत्वम्। सर्व्ववश्यकारित्वम्। रससिद्धिगुणप्रदत्वञ्च। इति राजनिर्घण्टः॥

गोरची, स्त्री, (गां रचति पालयति इति। "कर्म्मण्यण्।" ३। २। १। इति अण्। ततो ङीप्।) चुद्रचुपविशेषः। सा तु मालवे प्रसिद्धा। तत्पर्य्यायः। सर्पदण्डी २ दीर्घदण्डी ३ सुदण्डिका४ चित्रला ५ गन्धबहुला ६ गोपाली ७ पञ्चपर्णिका ८। अस्या गुणाः। मधुरत्वम्। तिक्तत्वम्। शिशिरत्वम्। दाहपित्तविस्फोटवान्त्यतीसारज्वरदोषनाशित्वञ्च। गोरचदुग्धा। कुम्भतुम्बी। इति राजनिर्घण्टः॥

गोरङ्कुः, पुं, (गवा वाचा रङ्कुर्मृगविशेष इव।) पचिभेदः। लग्नकः। वन्दी। इति मेदिनी। के। ८५॥ क्वचित् पुस्तके लग्नकस्थाने नग्नकोऽपि पाठः॥

गोरटः, पुं, (गवि इन्द्रिये रटतीति। रट्+अच्।) दुर्गखदिरः। इति राजनिर्घण्टः॥

गोरणं, क्ली, (गुर्+भावे ल्युट्।) गुरणम्। (गुर्य्यते गम्यते फलमनेनेति। गुर+करणे ल्युट्।) उद्यमः। इत्यमरटीका॥

गोरसः, पुं, (गवां रसः।) दुग्धम्। दधि। तक्रम्। इति हेमचन्द्रः। ३। ७२॥ (यथा, गोः रामायणे। ३। २२। ७।

"प्राप्तकामा जनपदाः सम्पन्नयवगोरसाः।
विचरन्ति महीपाला यात्रार्थं विजिगीषवः॥"
"विशदा गुरवो रूचा ग्राहिणस्तक्रपिण्डकाः।
गोरसानामयं वर्गो नवमः परिकीर्त्तितः॥"
इति चरके सूत्रस्थाने २७ अध्याये॥)

गोरसजं, क्ली, (गोरसात् जायते इति। गोरस+जन्+"अन्येष्वपि दृश्यते।" ३। २। १०१। इति डः।) तक्रम्। इति राजनिर्घण्टः॥

गोराटी, स्त्री, (गां मनुष्यवद्वाचं रटतीति। रट्+"कर्म्मण्यण्।" ३। २। १। इत्यण्। ततो ङीप्।) शारिकापची। इति हेमचन्द्रः। ४। ४०२॥

गोराटिका, स्त्री, (गोराटी+स्वार्थे कन्। टाप् पूर्व्वह्रस्वश्च। ततो निपातनात् साधुः। गोराटिका इत्यपि दृश्यते।) शारिकापची। इति राजनिर्घण्टः॥

गोरिका, स्त्री, (गोराटिका+पृषोदरात् साधुः।) शारिकापची। इति राजनिर्घण्टः॥

गोरुतं, क्ली, (गो रुतं रवः श्रूयते यावता पर्य्यन्तेति शेषः। गोशब्दः श्रुतिगोचरत्वेन अस्त्यस्य इत्यच् इत्येके वस्तुतस्तु पारिभाषिकोऽयं शब्दः।) क्रोशद्वयम्। इति हेमचन्द्रः। ३। ५५१॥ (गवां रुतं रवः इति तत्पुरुषसमासे तु गवां शब्दमात्रे। तत्तु कालादिभेदेन स्वामिनरपतिप्रभृतीनां शुभाशुभकरं स्यात्। यथा, बृहत्संहितायाम्। ६२। १—३।

"गावो दीनाः पार्थिवस्याशिवाय
पादैर्भूमिं कुट्टयन्त्यश्च रोगान्।
मृत्युं कुर्व्वन्त्यश्रुपूर्णायताच्यः
पत्युर्भीतास्तस्करानारुवन्त्यः॥
अकारणे क्रोशति चेदनर्थो
भयाय रात्रौ वृषभः शिवाय।
भृशं निरुद्धा यदि मचिकाभिस्तदाशु वृष्टिं सरमात्मजैर्वा॥
आगच्छन्त्यो वेश्म बम्भारवेण
संसेवन्त्यो गोष्ठवृद्ध्यै गवां गाः।
आर्द्राङ्ग्यो वा हृष्टरोमण्यः प्रहृष्टा
धन्या गावः स्युर्महिष्योऽपि चैवम्॥")

गोरोचं, क्ली, (गोभिः तेजोभिरुच्यते दीप्यते इति। रुच्+अप्। गा इन्द्रियाणि इन्द्रियोपलचितानि शरीरादीनि रोचयति दीपयति औषधादियोगेनेत्यर्थः। रुच्+णिच्+अच्।) हरितालम्। इति राजनिर्घण्टः॥

गोरोचना, स्त्री, (गोर्जाता रोचना हरिद्रा इव।) स्वनामख्यातपीतवर्णद्रव्यम्। तत्तु गोमस्तकस्थशुष्कपित्तम्। यथा, माधवकरे।

विशोषयेद्वस्तिगतं सशुक्रं
मूत्रं सपित्तं पवनः कफं वा।
यदा तदाश्मर्य्युपजायते च
क्रमेण पित्तेष्विव रोचना गोः॥"

तत्पर्य्यायः। रुचिः २ शोभा ३ रुचिरा ४ शोभना ५ शुभा ६ गौरी ७ रोचनी ८ पिङ्गा ९ मङ्गल्या १० मङ्गला ११ शिवा १२ पीता १३ गौतमी १४ गवा १५ चन्दनीया १६ काञ्चनी १७ मेध्या १८ मनोरमा १९ श्यामा २० रामा २१। इति राजनिर्घण्टः॥ वन्द्या २२ रोचना २३। अस्या गुणाः। हिमत्वम्। तिक्तत्वम्। वश्यमङ्गलकान्तिकारित्वम्। विषालच्मीग्रहोन्मादगर्भस्रावचतासनाशित्वञ्च। इति भावप्रकाशः॥ रुच्यत्वम्। पवित्रताशृङ्गारहितकारित्वम्। कृमिकुष्ठनाशित्वम्। भूतोपशमनत्वम्। जनमोहनत्वञ्च। इति राजनिर्घण्टः॥ (यथा कुमारे। ७। १५।

"विन्यस्तशुक्लागुरुचक्रुरङ्गं
गोरोचनापत्त्रविभक्तमस्याः।"
"क्रमेण पित्तेष्विव रोचना गोः।"
इति माधवकृतरुग्विनिश्चयस्याश्मर्य्यधिकारे॥)

गोर्द्दं, क्ली, (गुर्+"अर्द्दादयश्च।" उणां। ४। ९८। इति दद्नप्रत्ययेन निपातनात् साधुः।) मस्तिष्कम्। मस्तकस्थघृतम्। इत्यमरः। २। ६। ६५॥ (मस्तिष्कशब्देऽस्य विवरणं ज्ञातव्यम्॥)

गोलं, क्ली, (गुड़+भावे घञ् डस्य लत्वं च।) मण्डलम्। इति मेदिनी। ले। २५॥ (यथा, भागवते। ३। २३। ४३। [स्थया॥")
"प्रेचयित्वा भुवो गोलं पत्न्यै यावान् स्वसं-

गोलः, पुं, (गुड़+भावे घञ् अजित्येके। डस्य लत्वम्।) सर्व्ववर्त्तुलः। इति हेमचन्द्रः॥ मदनवृचः। इति रत्नमाला॥ जारात् विधवायाः सुतः। इति धरणी॥ (यथा, याज्ञवल्क्यः। १। २२२।

"अवकीर्णी कुण्डगोलौ कुनखी श्यावदन्तकः॥")

बोलः। इति जटाधरः॥ भूगोलः खगोलश्च। (यथा, भागवते। ५। २०। ४३।

"सूर्य्याण्डगोलयोर्मध्ये कोट्यः स्युः पञ्च
विंशतिः॥")

यथा, शिद्धान्तशिरोमणौ। [त्वम्॥"
"गोलं श्रोतुं यदि तव मतिर्भास्करीयं शृणु

एकराशौ षड्ग्रहयोगः। यथा, प्रश्नकौमुद्याम्।

"ग्रहाणामेकस्मिन् यदि भवति षण्णां निवसतिस्तदा गोलो योगः प्रलयपदमिन्द्रोऽपि लभते।
भवेल्लोको रचः परिहरति पुत्रञ्च जननी नृपाणां
नाशः स्यात् ज्वलति वसुधा शुष्यति नदी॥"

एकराशौ सप्तग्रहयोगश्च। यथा, मयूरचित्रके।

"सप्तग्रहा यदैकस्था गोलयोगस्तदा भवेत्।
दुर्भिक्षं राष्ट्रपीड़ा च तस्मिन् काले नृपचयः॥"

अपि च। [संख्याख्याः।
"एकादिग्रहोपेतैरुक्तान् योगान् विहाय
गोलयुकशूलकेदारपाशदामाख्यवीनाः स्युः॥
दुःखितदरिद्रघातुकच्चधिकरदुःशीलपशुप-
निपुणानाम्॥
जन्मक्रमेण दुःखिनः परभाग्यैः सर्व्व एवैते॥"
इति दीपिका॥

गोलकं, क्ली, (गुड़+घञ्। स्वार्थे कन् च। ण्वुल् इत्येके।) गोलोकम्। यथा, तन्त्रे।

"यद्रूपं गोलकं धाम तद्रूपं नास्ति मामके॥"

गोलकः, पुं, (गुड़+घञ्। ततः स्वार्थे कन्। डस्य लत्वं च। ण्वुल् इत्येके।) मृते भर्त्तरि जारजः। इत्यमरः॥ राँड़ेर छेले इति भाषा॥ (यथा, मनुः। ३। १५६।

"शूद्रशिष्यो गुरुश्चैव वाग्दुष्टः कुण्डगोलकौ॥")

अलिञ्जरः। गुड़ः। पिण्डः। इति हेमचन्द्रः॥ गन्धरसः। इति रत्नमाला॥ कलायः। इति शब्दचन्द्रिका॥ मटर इति ख्यातः॥

गोला, स्त्री, (गां पृथ्वीं सर्व्वं जगदित्यर्थः स्वशक्तिव्यापकतया लाति प्रलयकाले स्वस्मिन् लाति गृह्णाति इति वा।) दुर्गा। (गां बहुयोजनपथं जलरूपशरीरव्यापकतया लाति।) गोदावरी। (गां वाचं लाति। ला+क्विप्।) सखी। कुनटी। पचाञ्जनम्। मण्डलम्। अलिञ्जरः। बालक्रीड़नकाष्ठम्। इति मेदिनी। ले। २५॥

गोलाङ्गूलः, पुं, (गोर्लाङ्गूलवल्लाङ्गूलमस्य।) वानरः। (यथा, रामायणे। ६। १०५। ८।

"निरुजो निर्व्रणांश्चैव सम्पन्नबलपौरुषान्।
गोलाङ्गूलांस्तथैवर्चान् द्रष्टुमिच्छामि मानद!॥")

तत्पर्य्यायः। कपित्यास्यः २ दधिशोणः ३ नगाटनः ४। इति त्रिकाण्डशेषः॥ कृष्णवानरः। इति राजनिर्घण्टः॥

गोलासः, पुं, (गां पृथ्वीं भूमिमित्यर्थः लासयति उल्लासयति विभूषयति इति यावत्।) गोमयच्छत्रिका। शिलीन्ध्रम्। इति हारावली। २५॥